# श्रीसुरसरस्वतीसभा, श्रृङ्गेरि

## तुरीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः -31-01-2021 | अङ्काः - 100

पूर्वाह्णे – 10:00वादनतः 1:00 वादनपर्यन्तम् | समयः – घण्टात्रयम्

सूचना – सर्वाणि उत्तराणि संस्कृते एव लेखनीयानि

**1. पञ्चानां एकवाक्येन उत्तरं लिखत ।** **5**

१. हस्तामलकः कः ?

२. वैराग्यशतकं केन विरचितम् ?

३. महाभारते कति श्लोकाः सन्ति ?

४. जनमेजयः कस्य पौत्रः ?

५. कौत्सः कः?

६. देवानाम् अपि देवता कः ?

७. 'चन्द्रोदयवर्णनम्' इति पाठः रामायणस्य कस्मात् सर्गात् उद्धृतः ?

८. दमयन्ती का ?

**2. पञ्चानां त्रिचतुर्भिर्वाक्यैः उत्तरं लिखत ।** **10**

१. शङ्कर इति नाम कथं सार्थकमासीत् ?

२. भगवतः सर्वात्मत्वं कथम् ?

३. धीमान् हनुमान् कीदृशं चन्द्रमपश्यत् ?

४. द्रुपदं दृष्ट्वा द्रोणः किमाह ?

५. सहस्रानीकः कः ? तं देवेन्द्रः किमुवाच ?

६. रघौ नाथे प्रजानामशुभं नेत्यत्र दृष्टान्तं विवृणुत ?

७. नलेन गृहीतः हंसः तं किमब्रवीत् ?

**3. द्वयोः विस्तरेण (सप्ताष्टभिर्वाक्यैः) उत्तरं लिखत ।** 8

१. उदयनस्य औदार्यं वर्णयत ।

२. कुन्त्या पृष्टः द्विजः स्वपरिदेवननिदानं किमाह ?

३. भगवता वेदव्यासेन उक्तं द्रौपद्याः पूर्ववृत्तान्तं वर्णयत ।

४. गिरिः गुरुसेवां कथं विदधौ ?

**4. वाक्यत्रयं सप्रसङ्गं विवृणुत ।** 9

१. ग्रहाणां गतिरधुना प्रतिकूला दृश्यते ।

२. लोकवृत्तसाक्षिणो देवाः पुण्यश्लोकं मे पतिं दिशन्तु ।

३. वत्से ! मा शुचः । कंचित्कालमत्रैवाश्रमे वस ।

४. आवयोः साङ्ग्रामिकमुपकरणं सम्पादय ।

५. कोटीश्चतस्रो दश चाहरेति ।

**5. द्वयोः भावं विशदयत ।** 8

१. गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम् ।
गतो वदान्यान्तरमित्ययं मे मा भूत् परीवादनवावतारः ॥

२. विनष्टशीताम्बुतुषारपङ्कः महाग्रहग्राहविनष्टपङ्कः ।
प्रकाशलक्ष्म्याश्रयनिर्मलाङ्कः रराज चन्द्रो भगवान् शशाङ्कः ॥

३. यस्य चेतसि वर्तेथाः स तावत्कृतिनां वरः ।
किं पुनर्ब्रह्मयोनेर्यः तव चेतसि वर्तते ॥

**6. श्लोकमेकं पूर्णं लिखत ।** 4

१. यावत् ______________________ कीदृशः ।

**7. एकस्य कवेः देशकालकृतिमहत्त्वादीनाम् विषये लिखत ।** 4

१. कालिदासः      २. लक्ष्मणशास्त्री

**8. एकस्य लघुटिप्पणीं लिखत ।** **4**

१. हस्तामलकः २. पाण्डुः

**9. चत्वारि पदानि वाक्ये योजयत ।** **4**

| | | |
|---|---|---|
| १. शीतांशुः | २. आसन् | ३. मनसा |
| ४. तुण्डेन | ५. प्रसार्य | ६. मन्वानः |

**10. चतुर्णां रूपाणि विवेचयत ।** **4**

| | | |
|---|---|---|
| १. जज्ञे | २. रराज | ३. दक्षता |
| ४. भानुमन्तम् | ५. आम्बिकेयः | ६. पुत्रीयन् |

**11. चतुर्णां पर्यायपदानि लिखत ।** **4**

| | | |
|---|---|---|
| १. जाम्बूनदम् | २. अध्वरः | ३. पुष्करः |
| ४. शार्दूलः | ५. वीटा | ६. तरङ्गिणी |

**12. चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** **4**

| | | |
|---|---|---|
| १. मृगपक्षिणः | २. अपुत्रः | ३. पञ्चनली |
| ४. दुरात्मा | ५. चक्रपाणिः | ६. पाणिपादम् |

**13. चतुर्णां सन्धिं विभज्य नाम लिखत ।** **4**

| | | |
|---|---|---|
| १. स्वाभीष्टप्रदेशे | २. गच्छामस्तावत् | ३. पार्थादन्येन |
| ४. अधीयन्नर्जुनः | ५. सोऽयम् | ६.तच्छ्रुत्वा |

**14. द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** **6**

१. रोचते २. आह ३.अपृच्छत् ४. भाति

**15. द्वयोः व्याकरणविशेषं लिखत ।** **4**

१. विदर्भराजस्य २. मा कृथाः ३. अन्तर्वत्नी ४. आस्ते स्म

**16. समासमेकं सलक्षणं विशदयत ।** 4

१. द्विगुसमासः २. अव्ययीभावसमासः ।

**17. चतुर्थं पदं लिखत ।** 4

| | | | | | |
|---|---|---|---|---|---|
| १. पुरुषसिंहः | - | कर्मधारयः | :: | राजपुरुषः | ________ |
| २. शतानीकः | - | विष्णुमती | :: | अभिमन्युः | ________ |
| ३. उदयनचरितम् | - | अनन्ताचार्यः | :: | विष्णुस्तुतिः | ________ |
| ४. कुन्ती | - | पाण्डुः | :: | गान्धारी | ________ |

**18. इतरवचनानि लिखत ।** 4

| | | |
|---|---|---|
| १. ________ | ________ | सर्वे |
| २. फणिनं | ________ | ________ |
| ३. ________ | दुर्वाससौ | ________ |
| ४. ________ | अवधीतम् | ________ । |

**19. रिक्तस्थानानि पूरयत ।** 4

१. भवन्ति नम्राः ________________ फलोद्गमैः ।

२. प्रायः उत्तरपदार्थप्रधानः ________________ ।

३. क्लेशापहाय ________________ पार्थसारथये नमः ।

४. नैष्कर्म्यसिद्धिः इत्याख्यग्रन्थस्य रचयिता________ ।

**20. प्रयोगपरिवर्तनं कुरुत ।** 2

१. श्रृणु तत्र कारणम् ।

२. हिडिम्बा भ्रात्रा प्रेषिता ।

---

# श्रीसुरसरस्वतीसभा, श्रृङ्गेरि

## तुरीया परीक्षा

## द्वितीयपत्रिका

दिनाङ्कः **31-01-2021** अङ्काः - 50

पूर्वाह्णे –1:30 तः 3:00 पर्यन्तम् समयः – सार्धैकहोरा

<u>सूचना – सर्वाणि उत्तराणि संस्कृते एव लेखनीयानि</u>

**1 विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत ।** 5

१. रामायणम् २. साङ्क्रमिकरोगः ३. गणतन्त्रोत्सवः

2 (अ) द्वितीया विभक्तिः कदा भवति ? सोदाहरणं विवृणुत । 4

(आ) प्रयोगाः के ? भावे प्रयोगं सोदाहरणं विवृणुत । 4

3 (अ) श्लेषालङ्कारं सोदाहरणं सलक्षणं विशदयत । 4

(आ) " प्रियेषु सौभाग्यकला हि चारुता "- एतस्य वृत्तं सलक्षणं विवृणुत । 4

**4 उत्तरं लिखत । (त्रयाणामेव)** 3

विना इत्यस्य योगे काः विभक्तयः प्रयोक्तुं शक्यन्ते ?

१. पूर्णविरामचिह्नं कदा उपयुज्यते ? सोदाहरणं लिखत ।

२. सर्वगुरुः - कस्मिन् गणे भवति ?

३. अलङ्काराः कति विधाः ?

**5 द्वयोः लकारयोः पुरुषत्रये सर्वरूपाणि लिखत ।** 6

१. लब्धा २.अकार्षीत् ३. बभूव ४. ववृधे

**6 प्रयोगपरिवर्तनं कुरुत ।** 4

१. तमसा नश्यताम्। २. सः त्वां पश्यति।

३. त्वमक्रीडः । ४. वयं स्थास्यामः।

**7 वाक्यदोषं परिहरत ।** **4**

१. हरिः भक्तिः रोचते।

२. भक्तः पापेन विरमति ।

३. अग्नाय स्वाहा ।

४. कुण्डलेन हिरण्यम्।

**8 टिप्पणीं लिखत । (एकस्य)** **2**

१. निर्धारणम् २. लुङ्-लकारः

**9 मातृभाषया अनूद्यत ।** **5**

१. सः भगवान् कृष्णः कंसं जघान ।

२. यदि लक्षमणः आगमिष्यत्तदा रावणः सीतामपहर्तुं नाशक्ष्यत् ।

३. रामः गोषु दुह्यमानासु गतः ।

४. गुरोः प्रसादेन विद्वांसः भूयास्म ।

५. धर्मम् अन्तरेण कार्यं न सिद्ध्यति ।

**10 संस्कृतभाषया परिवर्तयत ।** **5**

१. ಹನುಮಂತನು ಲಂಕೆಯನ್ನು ಪ್ರವೇಶಿಸಿದನು.
Hanuman entered Lanka.

२. ನೀವು ದೀರ್ಘಕಾಲ ಬಾಳಿರಿ.
May you all live long.

३. ಬೆಂಕಿ ಉರಿದಿದ್ದರೆ ಅಡಿಗೆಯನ್ನು ಮಾಡುತ್ತಿದ್ದಳು.
If the stove was burning, she could have cooked.

४. ಅವಳು ಭಾರತೀಯ ಸಂಸ್ಕೃತಿಯನ್ನು ಕುರಿತು ಸಭೆಯಲ್ಲಿ ಮಾತಾಡುವಳು.
She will speak about Indian culture in the Sabha (assembly).

५. ಕೌಸಲ್ಯೆ ಬರಲಾಗಿ ಸೀತೆ ಎದ್ದು ನಿಂತುಕೊಂಡಳು.
Seetha stood up as Kousalya came.

--------------------------